# भाट्टसिद्धान्तानुसारं धर्मजिज्ञासाधिकरणविमर्शः

चन्दनः मुखर्जी
शोधच्छात्रः, संस्कृत-दर्शन-विभागः
रामकृष्णमिशन्-विवेकानन्द-शैक्षणिकशोधसंस्थानम्, वेलुडमठः पश्चिमबङ्गराज्यम्
**Email: chandanmukherjee711@gmail.com**

## १. उपोद्घातः

भारतीयदर्शनेषु मीमांसादर्शनस्य स्थानं महद्वर्तते। विषयबाहुल्यदृष्ट्या विषयगाम्भीर्यदृष्ट्या चास्य दर्शनस्य प्रशस्तिः नितरां विद्यते। वैदिककर्मकाण्डरूपेण वाक्यशास्त्ररूपेण च नैकासां समस्यानां समाधानायेदं शास्त्रं न केवलं दार्शनिकसाहित्यायापि तु व्याकरणधर्मशास्त्रादीनाम् अध्ययनाय अपि अत्यन्तमेवोपादेयं वर्तते। कुमारिलभट्टमतानुसारं - "मीमांसाख्या तु विधेयं बहुविद्यान्तराश्रिता" इति। विचारप्रधानस्यास्य शास्त्रस्य विचारशास्त्रमिति अभिधानं सर्वत्रैव शास्त्रे कृतं वर्तते। "विचारोपायभूतं न्यायनिबन्धनं मीमांसाशास्त्रम्" इति प्रसिद्धम्। पदवाक्यप्रमाणशास्त्रेषु चेदं शास्त्रं वाक्यशास्त्ररूपेण विद्वत्परिषदि शोभते। यतो हि वाक्यनिर्णयाय यावन्ति साधनानि इदं शास्त्रं प्रस्तुवति, नान्यम्। शास्त्रे प्रकरणादिभिः वाक्यार्थानां नियमनम्, अथ च उपक्रमोपसंहारादिभिः लिङ्गैः ज्ञानस्यानिवार्यतां साधितं वर्तते। अत एव इदं शास्त्रं वाक्यशास्त्ररूपेण अत्यन्तमेव महत्वपूर्णं वर्तते।

## २. पूर्वमीमांसाशास्त्रम्

षट्सु भारतीयदर्शनेषु साक्षात् वेदमाश्रित्य ये दर्शने प्रवृत्ते ते हि पूर्वमीमांसादर्शनम् उत्तरमीमांसादर्शनञ्च। मीमांसाशब्दस्यार्थः पूजितविचारः। उत्तरमीमांसादर्शनं वेदान्तदर्शननाम्ना, पूर्वमीमांसादर्शनं च मीमांसादर्शननाम्ना प्रसिद्धिं गतम्। एतयोः मध्ये मीमांसादर्शनं कर्मकाण्डात्मकस्य वेदभागस्य विचाराय प्रवृत्तम्। अर्थात् कर्मकाण्डे विहितानां विषयाणां यत्र चर्चा भवति, यत्र च वेदविहितेषु विषयेषु संशये सति समाधानं लभ्यते तदेव पूर्वमीमांसादर्शनम्। अस्य शास्त्रस्य प्रतिपाद्यविषयत्वेन धर्मजिज्ञासा एव तत्र मुख्यो विषयः। विधिविहितत्वात् धर्मस्य मूलं वेद एव। तत्र विधि-मन्त्र-नामधेय-अर्थवाद-निषेध-भेदेन वेदः पञ्चविधः। तेषु विधेः प्राधान्यात् विधिपदेन वेद एव ग्राह्यः। तथा हि - "चोदनालक्षणोऽर्थः धर्मः"[1] इति जैमिनिना प्रोक्तम्।

## ३. महर्षिजैमिनिः

महर्षेः जैमिनेः प्रामाणिकम् इतिवृत्तं यद्यपि नोपलभ्यते। प्राचीनसाहित्ये नैकप्रकारेण जैमिनिमहर्षिः निर्दिष्टो वर्तते। क्वचित् मीमांसागृह्यसूत्रयोः कर्तृत्वेन, क्वचित् सामवेदप्रवर्तकत्वेन, क्वचिच्च ज्योतिर्विद्रूपेण उल्लिखितो वर्तते। क्वचित् योगाचार्यरूपेण क्वचित् ब्रह्मविद्याविशेषज्ञरूपेण च निर्दिष्टो वर्तते। पुराणकाव्यादिप्राचीनसाहित्येष्वपि आचार्यस्य जैमिनेः नाम श्रूयते। एतद्विहाय मीमांसासूत्रेष्वपि बहुत्र स्थलेषु जैमिनेरभिधानं वर्तते। यथा - "कर्मण्यपि जैमिनिः फलार्थत्वात्"[2] इति, "अधिकं च विवरणं जैमिनिः स्तोभशब्दत्वात्"[3] इति, "जैमिनेः परतन्त्रत्वापत्तेः स्वतन्त्रप्रतिषेधः स्यात्"[4] स्यात् चेति। जैमिनेः समयः ख्रिष्टीयद्वितीयशताब्दीतः पूर्वं भवितुं नार्हति। यतो हि जैमिनिः बादरायणसमकालिनः। तेन विरचितः द्वादशलक्षणीनाम्ना ग्रन्थः पूर्वमीमांसादर्शनस्य मुख्यो ग्रन्थः।

## ४. द्वादशलक्षणी

---

[1]मीमांसासूत्रम् (१/१/२)
[2]मीमांसासूत्रम् (३/१/४)
[3]मीमांसासूत्रम् (९/२/११)
[4]मीमांसासूत्रम् (१२/१/३)


©Indira Gandhi National Open University

परमकारुणिकः जैमिनिः द्वादशलक्षणीं विरचितवान्। द्वादशलक्षण्याः एव अपरं नाम जैमिनीयसूत्रं पूर्वमीमांसासूत्रं वा। उच्यते लौगाक्षिभास्करेण - "अथ परमकारुणिको भगवान् जैमिनिर्धर्मविवेकाय द्वादशलक्षणीं प्रणिनाय"[5] इति। अत्र लक्षणशब्दः अध्यायवाचकः। द्वादशानां लक्षणानां समाहारः द्वादशलक्षणी। अस्मिन् ग्रन्थे १२ अध्यायाः, ६० पादाः, २७४४ सूत्राणि च विलसन्ति।

| अध्यायः | अध्यायस्य नाम | पादः | सूत्रं | प्रतिपाद्यविषयः |
|---|---|---|---|---|
| 1 | धर्मस्वरूपम् (4/150) | प्रथमपादः | 32 | विधिप्रामाण्यम् |
| | | द्वितीयपादः | 53 | मन्त्रार्थवादप्रामाण्यम् |
| | | तृतीयपादः | 35 | स्मृतिप्रामाण्यम् |
| | | चतुर्थपादः | 30 | नामप्रामाण्यम् |
| 2 | कर्मभेदप्रमाणानि (4/139) | प्रथमपादः | 49 | कर्मभेदः |
| | | द्वितीयपादः | 29 | धातुभेदः |
| | | तृतीयपादः | 29 | कर्मभेदापवादः |
| | | चतुर्थपादः | 32 | नित्यकाम्ययोः भेदः |
| 3 | शेषशेषिभावविचारः (8/368) | प्रथमपादः | 27 | प्रमाणविचारः |
| | | द्वितीयपादः | 43 | लिङ्गप्रमाणम् |
| | | तृतीयपादः | 46 | वाक्यप्रकरणस्थानप्रमाणम् |
| | | चतुर्थपादः | 57 | निवीतोपवीतकर्माणि |
| | | पञ्चमपादः | 53 | प्रतिपत्तिकर्म |
| | | षष्ठपादः | 47 | विहितकर्म |
| | | सप्तमपादः | 51 | प्रयाजादिकर्म |
| | | अष्टमपादः | 44 | यजमानकर्म |
| 4 | अङ्गाङ्गिभावसम्बन्धः (4/161) | प्रथमपादः | 48 | प्रधानकर्म |
| | | द्वितीयपादः | 31 | अप्रधानकर्म |
| | | तृतीयपादः | 41 | जुहूफलम् |
| | | चतुर्थपादः | 41 | राजसूययागे अप्रधानकर्म |
| 5 | प्रधानोपकारकम् (4/128) | प्रथमपादः | 35 | श्रुत्यर्थक्रमनिरूपणम् |
| | | द्वितीयपादः | 23 | क्रमभागवर्णनम् |

[5] अर्थसंग्रहः (प्रथमं वाक्यम्)


©Indira Gandhi National Open University

| अध्यायः | अध्यायस्य नाम | पादः | सूत्रं | प्रतिपाद्यविषयः |
| --- | --- | --- | --- | --- |
| | | तृतीयपादः | 44 | वृद्ध्यवृद्धिविचारः |
| | | चतुर्थपादः | 26 | प्रमाणानां दौर्बल्यत्वविचारः |
| 6 | अधिकारः (8/349) | प्रथमपादः | 52 | अधिकारी |
| | | द्वितीयपादः | 31 | अधिकारिधर्मः |
| | | तृतीयपादः | 41 | प्राप्यवस्तुग्रहणम् |
| | | चतुर्थपादः | 47 | वस्तुलोपः |
| | | पञ्चमपादः | 56 | प्रायश्चित्तम् |
| | | षष्ठपादः | 39 | सत्राधिकारी |
| | | सप्तमपादः | 40 | देयादेयवस्तुवर्णनम् |
| | | अष्टमपादः | 43 | लौकिकाग्निः |
| 7 | सामान्यातिदेशः (4/100) | प्रथमपादः | 23 | स्थानान्तरविचारः |
| | | द्वितीयपादः | 21 | अवशिष्टविचारः |
| | | तृतीयपादः | 36 | कारणस्थानान्तरणम् |
| | | चतुर्थपादः | 20 | लिङ्गस्थानान्तरणम् |
| 8 | विशेषातिदेशः (4/138) | प्रथमपादः | 43 | स्पष्टलिङ्गातिदेशः |
| | | द्वितीयपादः | 32 | अस्पष्टलिङ्गातिदेशः |
| | | तृतीयपादः | 36 | प्रबललिङ्गस्थानान्तरणम् |
| | | चतुर्थपादः | 27 | स्थानान्तरणापवादः |
| 9 | ऊहः (4/221) | प्रथमपादः | 58 | ऊहविचारः |
| | | द्वितीयपादः | 60 | सामोहः |
| | | तृतीयपादः | 43 | मन्त्रोहः |
| | | चतुर्थपादः | 60 | ऊहप्रश्नः |
| 10 | बाधः (8/497) | प्रथमपादः | 58 | द्वारलोपः |
| | | द्वितीयपादः | 74 | द्वारलोपोदाहरणम् |
| | | तृतीयपादः | 75 | कार्यबाधः |
| | | चतुर्थपादः | 59 | समुच्चयः |


©Indira Gandhi National Open University

| अध्यायः | अध्यायस्य नाम | पादः | सूत्रं | प्रतिपाद्यविषयः |
|---|---|---|---|---|
| | | पञ्चमपादः | 8 | ग्रहादिविचारः |
| | | षष्ठपादः | 80 | सामविचारः |
| | | सप्तमपादः | 73 | सामान्यविचारः |
| | | अष्टमपादः | 70 | नञर्थविचारः |
| 11 | तन्त्रनिरूपणम् (4/247) | प्रथमपादः | 71 | तन्त्रोपद्घातः |
| | | द्वितीयपादः | 66 | तन्त्रावापौ |
| | | तृतीयपादः | 54 | तन्त्रविस्तारः |
| | | चतुर्थपादः | 56 | आवापविस्तारः |
| 12 | प्रसङ्गनिरूपणम् (4/168) | प्रथमपादः | 46 | प्रसङ्गविचारः |
| | | द्वितीयपादः | 37 | तन्त्रिनिर्णयः |
| | | तृतीयपादः | 38 | प्रसङ्गसमुच्चयः |
| | | चतुर्थपादः | 47 | प्रसङ्गविकल्पः |

एवं मीमांसासूत्रोपरि बहवः भाष्यग्रन्थाः रचिताः। तेषु शबरस्वामिनः शाबरभाष्यमेव सर्वप्राचीनमिति मन्यन्ते।

### ५. मीमांसायाः सम्प्रदायाः

शबरस्वामिनः परवर्तिनि काले त्रयः टीकाकाराः आगताः। तेषामेव नामानुसारेण मीमांसादर्शनस्य त्रयः सम्प्रदायाः प्रतिष्ठिताः। कुमारिलभट्टस्य सम्प्रदायः, अयमेव तौतातिकसम्प्रदायनाम्नापि अभिधीयते। एष एव सम्प्रदायः भाट्टसम्प्रदायः इत्युच्यते। प्राभाकरमिश्राणां प्राभाकरसम्प्रदायः, अयमेव सम्प्रदायः गुरुसम्प्रदायः इत्यपि प्रोच्यते। तृतीयस्तु सम्प्रदायो भवति मुरारिमिश्रस्य। एतेषु मुरारिमिश्रस्य सम्प्रदायः तथा न प्रसिद्धः। अस्य सम्प्रदायस्य ग्रन्थाः प्रायः नैवोपलभ्यन्ते। कुमारिलभट्टस्य सम्प्रदायः अतीव प्रसिद्धः। कुमारिलस्य शिष्यः प्रभाकरः प्राभाकरमीमांसासम्प्रदायं प्रारब्धवान्। कुमारिलभट्टेन शाबरभाष्योपरि त्रयो ग्रन्थाः विरचिताः - श्लोकवार्तिकं तन्त्रवार्तिकं टुप्टीका च। प्रभाकरेण तावत् द्वे टीके शाबरभाष्योपरि विलिखिते - लघ्वी बृहती चेति। कुमारिलभट्टस्य परम्परायां प्रमुखाः दार्शनिकाः भवन्ति - पार्थसारथिमिश्रः माधवाचार्यः खण्डदेवाश्च। गुरुसम्प्रदाये शालिकनाथमिश्रः अत्यन्तं प्रसिद्धः।

### ६. धर्मविचारः

ननु धर्मानुष्ठानवशादेव अभिमतधर्मसिद्धिः इति वारं वारं प्रतिपाद्यते धर्मशास्त्रेषु। तर्हि धर्मः नाम कः इति जिज्ञासा उदेति। तत्र लौगाक्षिभास्करो वदति - "यागादिरेव धर्मः"[6] इति। तस्य लक्षणं चोक्तं - "वेदप्रतिपाद्यः प्रयोजनवदर्थो धर्मः"[7] इति। वेदप्रतिपाद्यत्वे सति प्रयोजनवत्त्वे च सति अर्थत्वं धर्मस्य लक्षणम्। धर्मः यागः वेदेन प्रतिपाद्यते। यागादौ लक्ष्ये लक्षणमिदं समन्वेति। यजेत स्वर्गकामः, अग्निहोत्रं जुहुयात् स्वर्गकामः इत्यादिवेदवाक्यैः प्रतिपाद्यमानाः यागादयः इति तेषु वेदप्रतिपाद्यत्वमस्ति। स्वर्गः प्रयोजनम्। यागेन स्वर्गः लभ्यते। तस्मात् प्रयोजनं यस्यास्ति सः

[6]अर्थसंग्रहः (पृ.११)

[7]अर्थसंग्रहः (पृ. ११)


Volume 2, Issue 2, 2023, p. 68-76, ISSN 2583-6331
©Indira Gandhi National Open University

प्रयोजनवान्। अतः यागः प्रयोजनवान्। पुनः इष्टफलजनकत्वेन यागः अर्थ्यते प्रार्थ्यते। तस्मात् यागः अर्थः। एवं यागे धर्मलक्षणसमन्वयः। यागादिरेव धर्मः।

एवं जैमिनिः अपि स्वसूत्रे - "चोदनालक्षणोऽर्थो धर्मः"[8] इति। चोदना नाम प्रवर्तना उपदेशः वा। उच्यते - "चोदनेति क्रियायाः प्रवर्तकं वचनमाहुः"[9] इति, "चोदना चोपदेशश्च विधिश्चैकार्थवाचिनः"[10] इति, "चोदनपदस्य विधिरूपवेदैकदेशपरत्वात्"[11] इति। चोदनापदं विधिवाक्यवाचकम्। एवं धर्मो नाम वेद एव।

**७. धर्मजिज्ञासाधिकरणम्**

**७.१. अधिकरणलक्षणम्**

अधिकरणं किमिति चेदुच्यते सामान्यतया विचारपद्धतिः। अधिकरणकौमुद्यां प्रोक्तम्- “अधिकृत्य क्रियतेऽर्थविचारो यस्मिन् तदधिकरणमि”ति। अर्थाद् विचार्यविषयमाधारीकृत्य यया पद्धत्या विचारो विधीयते सा पद्धतिरेव अधिकरणमित्युच्यते। सामान्यतया एकस्मिन्नधिकरणे एकार्थप्रतिपादकविषयाणां प्रस्तुतिर्विधीयते। मीमांसासम्प्रदायीया इयं पद्धतिरिति सामान्यतया उच्यते।

पुरा अधिकरणसरणिमाश्रित्य बहवो ग्रन्था विरचिताः। यथा जैमिनेः द्वादशलक्षणी, बादरायणस्य ब्रह्मसूत्रम्, भारततीर्थस्य वैयासिकन्यायमाला, भाट्टदीपिका, न्यायबिन्दुरित्यादयो ग्रन्था एनां सरणिमाश्रित्य विरचिताः।अधिकरणस्यापरं नाम पञ्चाङ्गन्यायः। तस्य पञ्चाङ्गानि भवन्ति-

"विषयो विशयश्चैव पूर्वपक्षस्तथोत्तरम्।

सङ्गतिश्चेति पञ्चाङ्गं शास्त्रेऽधिकरणं विदुः॥”[12]इति।

अङ्गविषये विवादे सत्त्वेऽपि उपर्युपन्यस्तानां समेषामङ्गानां सामान्यतः स्वरूपमधो वर्ण्यते-

**क) विषयः**- विचाराय यस्य वस्तुनः प्रस्तुतिर्भवति स एव विषय इत्युच्यते।

**ख) विशयः**- विशयो नाम संशयः सन्देहो वा। एकधर्मिणि विरुद्धनानाधर्मज्ञानं संशयः।

**ग) पूर्वपक्षः**- विचार्यविषयस्यायोग्यता प्रदर्शनमथवा तद्विरुद्धयुक्तिविन्यासः पूर्वपक्षः।

**घ) उत्तरम्**- पूर्वपक्षस्य युक्तिनिरासकारकं वाक्यमुत्तरं भवति। सिद्धान्तपक्ष इति नामान्तरम्।

**ङ) सङ्गतिः**- सङ्गतिर्हि सम्बन्धः।

**८. द्वादशलक्षण्यां जिज्ञासाधिकरणम्**

---

[8]मीमांसासूत्रम् (१/१/२)

[9]शाबरभाष्यम्

[10]श्लोकवार्तिकम्

[11]अर्थसंग्रहः

[12]श्लोकवार्तिकम्


©Indira Gandhi National Open University

"अथातो धर्मजिज्ञासा"[13] इति सूत्रेण आरभ्यते द्वादशलक्षण्यां जिज्ञासाधिकरणम्। अथशब्दः वेदाध्ययनानन्तर्यवचनः। अर्थात् वेदाध्ययनात् परमेव धर्मजिज्ञासा कर्तव्या इति। अतः शब्दः वेदाध्ययनस्य दृष्टार्थत्वं वदति। "स्वाध्यायोऽध्येतव्यः"[14]इति अध्ययनविधौ तदध्ययनस्य अर्थज्ञानरूपदृष्टार्थकत्वेन व्यवस्थापनम् इति। धर्मजिज्ञासां प्रति हेतुः वेदाध्ययनस्य अर्थज्ञानरूपदृष्टफलम्, अतः धर्मजिज्ञासेति। एवं विचारे क्रियमाणे प्रथमं वेदवाक्यानाम् अध्ययनं सामान्यतः तदर्थज्ञानं च यदि न स्यातां तर्हि निर्णयात्मकविचारस्य कुत्रावसरः। अतः वेदाध्ययनस्य दृष्टफलार्थत्वं जिज्ञासां प्रति हेतुः। अत्र प्रश्नो भवति - जिज्ञासा नाम ज्ञातुमिच्छा। तर्हि इच्छायाः कर्तव्यत्वं कथं सङ्गच्छते। जिज्ञासा इत्यत्र ज्ञाधातुः इच्छार्थकसन्प्रत्ययश्च। तत्र धातोः ज्ञानसामान्यमर्थः। तस्य च विषयो धर्मः। धर्मविषयकं ज्ञानं धर्मसम्बन्धि वा ज्ञानमित्यर्थः। तथा च धर्मविषयकज्ञानेच्छा धर्मसम्बन्धिज्ञानेच्छा वेति सम्पन्नम्। तत्र विषयभूतस्य धर्मस्य ज्ञातत्वे प्रसिद्धत्वे वा तज्ज्ञानेच्छा नोपपद्यते ज्ञातत्वात् प्रसिद्धत्वाच्च। यदि वा विषयस्य धर्मस्य अज्ञातत्वम् अप्रसिद्धं वा तदा सर्वथा जिज्ञासायाः अनुपपत्तिः। तस्मात् जिज्ञासापदस्य विचारे लक्षणा इति अभिप्रायः। अतः धर्मविचारः कर्तव्यः इति अर्थः फलति। धर्मविषये बहुधा विप्रतिपत्तयः सन्ति। तदुक्तं कुमारिलभट्टैः-

"अन्तःकरणवृत्त्यादौ वासनायाश्च चेतसः।

पुद्गलेषु च पुण्येषु नृगुणेऽपूर्वजन्मनि॥"[15]इति

अतः धर्मस्वरूपं विचार्य एव निर्णेतुं शक्यते इति जिज्ञासापदस्य विचारे लक्षणा।

**९. भाट्टमतानुसारं जिज्ञासाधिकरणस्वरूपम्**

अधिकरणस्य पञ्चाङ्गानि तावत् - विषयः, संशयः, पूर्वपक्षः, सिद्धान्तः, सङ्गतिश्चेति। जिज्ञासाधिकरणे अपि आचार्यैः कुमारिलभट्टपादैः पञ्च अङ्गानि विवेचितानि।

**क) विषयः** - साध्यायोऽध्येतव्यः इति एतद्वाक्यं विषयः। स्वाध्यायो नाम वेदः। वेदः अध्येतव्यः।

**ख) संशयः** - "चोदनालक्षणोऽर्थो धर्मः"[16] इति आदिमं मीमांसासूत्रम्। पुनः "अन्वाहार्ये च दर्शनात्"[17] इति अन्तिमं मीमांसासूत्रम्। एवं प्रकारकं जैमिनीयधर्मशास्त्रम् आरम्भणीयं न वेति संशयः अध्ययनविधेः अदृष्टार्थत्वदृष्टार्थत्वाभ्याम्। स्वाध्यायः अध्येतव्यः इत्यत्र दृष्टार्थत्वम् अपि अस्ति, पुनः अदृष्टार्थत्वमपि अस्ति। दृष्टार्थः तावत् अर्थज्ञानम्। अदृष्टार्थः स्वर्गप्राप्तिः। अध्ययनविधेः दृष्टार्थत्वे मीमांसाशास्त्रम् आरम्भणीयम्। पुनः अध्ययनविधेः अदृष्टार्थत्वे स्वर्गज्ञानपर्यन्ततात्पर्यात् मीमांसाशास्त्रं नारम्भणीयम्। तस्मात् अत्र सन्देहः मीमांसाशास्त्रम् आरम्भणीयं न वेति।

**ग) पूर्वपक्षः** - मीमांसाशास्त्रं न आरम्भणीयमिति पूर्वपक्षः। अध्ययनविधेः अर्थावबोधलक्षणत्वात् अदृष्टफलकत्वानुपपत्तेः। अर्थावबोधार्थम् अध्ययनविधिः इति चेत् किम् अत्यन्तम् अप्राप्तम् अध्ययनं विधीयते किं वा पाक्षिकम् अवघातवत् नियम्यते इति।

- <u>अध्ययनविधौ अपूर्वविधिः नास्ति इति पूर्वपक्षः</u> -
  अज्ञातार्थज्ञापको वेदभागो विधिः। प्रमाणान्तरेण अप्राप्तस्य प्रापको विधिः अपूर्वविधिः। स च प्रमाणान्तरेण अप्राप्तं विधत्ते। यथा अग्निहोत्रं जुहुयात् स्वर्गकामः इति विधिः मानान्तरेण अप्राप्तं स्वर्गप्रयोजनवद्धोमं विधत्ते। तथा अध्ययनविधिर्नास्ति। वेदाध्ययनम् अर्थावबोधहेतुः अध्ययनत्वात् भारताध्ययनवत् इति अनुमानेन विधिं परित्यज्यापि अर्थावबोधो भवति। तस्मात् अध्ययनविधौ विध्यपेक्षा नास्ति।

---

[13]द्वादशलक्षणी (१/१/१)

[14]तैत्तिरीयारण्यकम् (२/१५/७)

[15]श्लोकवार्तिकम्

[16]मीमांसासूत्रम् (१/१/२)

[17]मीमांसीसूत्रम् (१२/४/४७)


©Indira Gandhi National Open University

- <u>अध्ययनविधौ नियमविधिः नास्ति इति पूर्वपक्षः</u> -
  पक्षे अप्राप्तस्य प्रापको विधिः नियमविधिः। यथा नखविदलनादिना तण्डुलनिष्पत्तिसम्भवात् पाक्षिकः अवघातः अवश्यं कर्तव्यः इति विधिना नियम्यते। तथा, लिखितपाठेनापि अर्थज्ञानसम्भवात् पाक्षिकमध्ययनं विधिना नियम्यते इति चेत् न, दृष्टान्तदार्ष्टान्तिकयोः वैधर्म्यसम्भवात्।

अवघातनिष्पन्नतण्डुलैः पुरोडाशादिनिर्माणे अवान्तरापूर्वम् उत्पद्यते, तेन दर्शपूर्णमासयागे परमापूर्वम् उत्पद्यते। नखविदलनैः निष्पन्नैः तण्डुलैः तथापूर्वं नोत्पद्यते। अतः अपूर्वोत्पादनाय नियमविधिः। प्रकृतपक्षे लिखितपाठाध्ययनद्वारा अर्थावबोधसम्भवात् क्रत्वनुष्ठानसिद्धेः अध्ययनस्य नियमविधिर्नास्ति। तस्मातदध्ययने न नियमविधिः इति पूर्वपक्षः। मीमांसाशब्दस्य विधित्वं नास्ति इति पूर्वाः।

- <u>अध्येतव्यः इत्यत्र अक्षरग्रहणमात्रविधिः इति पूर्वपक्षः</u> -
  स्वाध्यायः अध्येतव्यः इत्यत्र तव्यप्रत्ययश्रवणात् अध्ययनविधेः का गतिरिति चेत् - स्वर्गफलकः अक्षरग्रहणमात्रविधिः इति। कथं विधिरिति चेत् - विश्वजिन्न्यायेनेति। विश्वजिन्न्यायेन अश्रुतस्यापि स्वर्गस्य कल्पयितुं शक्यत्वात्। जैमिनीयसूत्रमत्र प्रमाणं - "स स्वर्गः सर्वान्पत्यविशिष्टत्वात्"[18] इति। तदुक्तं -

  "विनापि विधिना दृष्टलाभान्न हि तदर्थता।
  कल्प्यस्तु विधिसामर्थ्यात्स्वर्गो विश्वजिदादिवत्॥"[19]इति

  अक्षरग्रहणमात्रेणैव स्वर्गसिद्धिः इति पूर्वपक्षिणां सिद्धान्तः।

- <u>समावर्तनस्मृतिबलात् समावर्तनशास्त्राच्च धर्मविचारशास्त्रं नारम्भणीयमिति पूर्वपक्षः</u>
  अध्ययनविधेः अर्थानवबोधकत्वे वेदमधीत्य स्नायादिति स्मृतिरपि अनुगृहीता भवति। वेदाध्ययनसमावर्तनयोः मध्ये अव्यवधानम् अवगम्यते। यदि अध्ययनविधिना एवार्थावबोधः स्यात्, तर्हि धर्मविचाराय शिष्यैः गुरुकुले वस्तव्यम्। एवम् वेदाध्ययनसमावर्तनयोः व्यवधानम् अपेक्ष्यते। तस्मात् विचारशास्त्रस्य वैधत्वाभावात् केवलं पठनमात्रेण स्वर्गसिद्धेः समावर्तनशास्त्राच्च विचारशास्त्रम् अनारम्भणीयमिति पूर्वपक्षः।

**घ) सिद्धान्तपक्षः** - सिद्धान्तिनः भाट्टास्तु धर्मविचारशास्त्रम् आरम्भणीयमेव इति प्रतिपादयन्ति।

- <u>स्वाध्यायोऽध्येतव्यः इत्यत्र नास्ति अपूर्वविधिः</u> -
  अन्यतः प्राप्तत्वात्, लिखिचपाठादिनापि अर्थावबोधात् अध्ययनविधेः अपूर्वविधित्वं मास्तु।

- <u>स्वाध्यायोऽध्येतव्यः इत्यत्र अवश्यमेव नियमविधिः</u> -
  नियमविधित्वपक्षस्तु वज्रहस्तेनापि अपहस्तयितुं न पार्यते। अध्येतव्यः इति तव्यप्रत्ययः प्रेरणापरपर्यायः पुरुषप्रवृत्तिरूपार्थः शाब्दीभावनायुतः।

- <u>अध्येतव्यः इति शब्दार्थः आर्थीभावनायां साध्यत्वेन नान्वेति</u> -
  आर्थीभावनायाम् अध्ययनं भाव्यत्वेन साध्यत्वेन नान्वेति। सुखकरः एव शब्दः आर्थीभावनायां साध्यत्वेन अन्वेति। परन्तु अध्ययनशब्दार्थः स्वाधीनोच्चारणक्षमः वाङ्मनसव्यापाररूपः क्लेशार्थकः तस्मात् अध्ययनमिति शब्दः आर्थीभावनायां साध्यत्वेन न संगच्छते।

---

[18]जैमिनीयसूत्रम् (४/३/१)

[19]सर्वदर्शनसंग्रहः (जैमिनिदर्शनम्)


©Indira Gandhi National Open University

- स्वाध्यायः इति शब्दार्थः आर्थीभावनायां साध्यत्वेन नान्वेति -
  पुनः आर्थीभावनायां स्वाध्यायः इति पदमपि साध्यत्वेन नान्वेति। स्वाध्यायशब्दार्थः वर्णराशिः नित्यः विभुः। स्वाध्यायः नाप्यः, नापि विकार्यः, नापि उत्पाद्यः, नापि संस्कार्यः।

- तस्मात् आर्थीभावनायाम् अर्थावबोधः साध्यत्वेन अन्वेति -
  सामर्थ्यप्राप्तः अवबोधः भाव्यत्वेन अन्वेति। अर्थी समर्थो विद्वान् अधिक्रियत इति न्यायेन दर्शपूर्णादयः विधयः स्वविषयावबोधम् अपेक्षमाणाः तिष्ठन्ति। तथा स्वार्थबोधे स्वाध्यायं विनियुङ्क्ते। अध्ययनविधिः लिखितपाठादीन् व्यवर्तयति, किञ्च अध्ययनसंस्कृतत्वं स्वाध्यायम् अवगमयति। न च विश्वजिन्न्यायेन फलकल्पना अवलोक्यते। अर्थावबोधे फले दृष्टे सति फलान्तरकल्पनायाः अयोगात्। उच्यते च -

  "लभ्यमाने फले दृष्टे नादृष्टफलकल्पना।

  विधेस्तु नियमार्थत्वान्नानर्थक्यं भविष्यति॥"[20] इति।

  तस्मात् अध्ययनविधौ नियमविधिः अस्ति एव। अतः विचारशास्त्रम् आरम्भणीयम् इति सिद्धान्तः।

- पुनः शङ्का समाधानञ्च -
  अत्र प्रश्नो भवति - ये केवलं वेदमात्रं पठन्ति तेषाम् अर्थज्ञानं मा भवतु नाम, परन्तु ये साङ्गवेदाध्यायिनः, तेषां तु अर्थावबोधः भवत्येव। तस्मात् विचारशास्त्रस्य वैफल्यं सिद्धमिति चेत् न, बोधमात्रसम्भवे अपि निर्णयस्य विचाराधीनत्वात् इति। यथा - अक्ताः शर्करा उपदधाति[21] इत्यत्र घृतेनैव सिक्तता विधेया, न तु तैलेन इति निर्णयः व्याकरणेन निगमेन निरुक्तेन वा न सम्भवति। अयं निर्णयः तु केवलं विचारशास्त्रेण कार्यः - तेजो वै घृतमिति वाक्यशेषवशात् अर्थनिर्णयः। तस्मात् विचारशास्त्रस्य वैधत्वं सिद्धम्। तस्मात् विधिसामर्थ्यात् एव अधिकरणसहस्रात्मकं पूर्वमीमांसाशास्त्रं विचारशास्त्रमिदम् आरम्भणीयम् इति सिद्धान्तपक्षः।

**ङ) सङ्गतिः** - शास्त्रेषु षोढा सङ्गतिः प्रतिपाद्यते -

"सप्रसङ्ग उपोद्घातः हेतुतावसरस्तथा।

निर्वाहकैक्यकार्यैक्ये षोढा सङ्गतिरिष्यते॥" इति

प्रकृते अत्र उपोद्घातसङ्गतिः। इदं चाधिकरणं शास्त्रेण उपोद्घातत्वेन सम्बध्यते। उच्यते - "चिन्तां प्रकृतिसिद्ध्यर्थामुपोद्घातं प्रचक्षते"[22] इति।

**१०. उपसंहारः**

मीमांसायाः प्रतिपाद्यः धर्मः एव। मन्त्राणां कश्चन अर्थः भवतीति न मीमांसकाः स्वीकुर्वन्ति, किन्तु एषां विधिषु विनियोगात् भवति सार्थकता। अत्रैव अर्थवादवाक्यानि अपि सन्ति। अर्थवादवाक्यैः साक्षात् विधानं न क्रियते। यथा विविधाः आख्यायिकाः वेदेषु सन्ति तासामाख्यायिकानामुपयोगः साक्षाद्विधाने नास्ति परन्तु परम्परया तु तत्रैव तासामुपयोगो भवति। एवं धर्मविचारशास्त्रमिदं वेदवाक्यार्थविचारे अतीव महत् स्थानं लभते इति शम्।

*****

## आश्रितग्रन्थसूची (Bibliography)

---

[20]सर्वदर्शनसंग्रहः (जैमिनिदर्शनम्)

[21]तैत्तिरीयब्राह्मणम् (३/१२/५)

[22]सर्वदर्शनसंग्रहः (जैमिनिदर्शनम्)


©Indira Gandhi National Open University

१. पाण्डेयः, डाँ. मुरलीधरः (सं०)। शाङ्करवेदान्तकोशः (कुलपतेः प्रो. यदुनाथप्रसाद- दुबेमहोदयस्य प्रस्तावनया विभूषितः)। सरस्वतीभवन-अध्ययनमाला ४८। वाराणसी। सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, २०१६ (द्वितीयं संस्करणम्)।

२. शर्मा, डाँ. उमाशङ्कर (भाष्यकारः)। सर्वदर्शनसंग्रहः (विद्याभवन संस्कृत ग्रन्थमाला ११३)। वाराणसी। चौखम्बा विद्याभवन, २०१९।

३. उपाध्याय, श्री बलदेव (सं०)। संस्कृत वाङ्मय का बृहत् इतिहास (नवम खण्ड, मीमांसा)। उत्तरप्रदेशसंस्कृतसंस्थानम्, १९९६।

४. लौगाक्षिभास्करः। अर्थसङ्ग्रहः। चौखम्बा ओरियेन्टला। वाराणसी। २०१९।


©Indira Gandhi National Open University